## डाबुभाभ्यामन्यतरस्याम्। (१३/४६१)

[1]डाप् प्रत्ययो भवति उभाभ्यां मन्नन्तात् प्रातिपदिकात् अनन्ताच्च बहुव्रीहेरन्यतरस्याम्। पामा, पामे, पामाः। सीमा, सीमे, सीमाः। न च भवति। [2]पामानः। सीमानः। बहुव्रीहौ – बहुराजा, बहुराजे, बहुराजाः। [3]बहुतक्षा, बहुतक्षे, बहुतक्षाः। न च भवति। [4]बहुराजानः। [5]बहुतक्षाणः। अन्यतरस्यां[6]ग्रहणं किमर्थम्? बहुव्रीहौ, 'वनो र च' (४.१.७/४५६) इत्यस्यापि विकल्पो यथा यात्। बहुधीवा, बहुधीवरी, बहुपीवा, बहुपीवरी॥

## अनुपसर्जनात्। (१४/४६०)

अधिकारोऽयम्। उत्तरसूत्रेषूपसर्जने[7] प्रतिषेधं करोति। यद् इत ऊर्ध्वमनुक्रमिष्यामोऽनुपसर्जनात् इत्येवं तद् वेदितव्यम्। टिड्ढाणञ् (४.१.१५/४७०) [8]इति ङीप्। कुरुचरी। [9]मद्रचरी। अनुपसर्जनात् इति किम्? बहुकुरुचरा, [10]बहुमद्रचरा मधुरा। जातेः (४. १. ६३/५१८) [11]इति ङीष्। कुक्कुटी। शूकरी। अनुपसर्जनात् इति किम्? [12]बहुकुक्कुटा, बहुशूकरा [13]मधुरा। कथं पुनरुपसर्जनात् [14]प्रत्ययप्रसङ्गः? तदन्तविधिना। ज्ञापितं चैतदस्त्यत्र प्रकरणे तदन्तविधिः इति। तथा च प्रधानेन तदन्तविधिर्भवति। कुम्भकारी। [15]नगरकारी। न च अण् इति कृद्ग्रहणं, तद्धितोऽप्यणस्ति[16]॥

## टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयपठक्ठञ्कञ्क्वरप्ख्युनाम्। (१५/४७०)

[17]अतः इति सर्वत्र [18]अनुवर्तते। तत् सति सम्भवे विशेषणं भवति। टिदादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति। [19]टापोऽपवादः। [20]टितस्तावत् – कुरुचरी। मद्रचरी (३. २. १६/२९३०)। इह कस्मान्न भवति, पचमाना, यजमाना? व्यनुबन्धकत्वाल् लटः। ल्युडादिषु कथम्? टित्करणसामर्थ्यात्। इतरत्र [21]तु टेरेत्वं फलम्। [22]पठिता विद्या इति? आगमटित्त्वमनिमित्तं, टड्युटयुलौ तुट् च (४. ३.२३/१३९१) इति लिङ्गात्। ढ – सौपर्णेयी। वैनतेयी (४. १. १२०/११२३)। निरनुबन्धको ढशब्दः स्त्रियां नास्ति इति निरनुबन्धकपरिभाषा न प्रवर्तते (म. भा. २.२०८)। अण् – कुम्भकारी। [23]नगरकारी (३.२. १/२९१३)। औपगवी (४. ३. १२०/१५००)। णेऽपि क्वचिदणकृतं कार्यं भवति। चौरी, तापसी (४.४. ६२/१६१२)। दाण्डा, मौष्टा (४. २. ५७/१२६६) इत्यत्र न भवति। अञ् – औत्सी। औदपानी (४.१. ८६/१०७८)। 'शार्ङ्गरवाद्यञो ङीन्' (४. १. ७३/५२७) इति पुनरञो[24] ग्रहणं जातिलक्षणं ङीषं बाधितुम्। द्वयसच् – ऊरुद्वयसी। जानुद्वयसी (५. २. ३७/१८३८)। दघ्नच् – ऊरुदघ्नी। जानुदघ्नी (५. २. ३७/१८३८)।

---

1. बहुव्रीहेः स्त्रियां डाप् प्रत्ययो भवति अन्यतरस्याम् क. ड. 2. पामा पामानौ पामानः। सीमा सीमानौ सीमानः क. ड. 3. उदाहरणमिदं नास्ति फ. 4. बहुराजा बहुराजानौ इत्यधिकम् क. ग. 5. उदाहरणमिदं नास्ति ह. 6. ग्रहणं नास्ति इ. क. ड. 7. उपसर्जनमतिशेषं इ, उपसर्जनप्रतिषेधं ब. 8. इत्यादिना क. 9. नास्ति फ. ह. 10. बहुमद्रचरा नास्ति ह. 11. इति नास्ति क. 12. बहुकुक्कुरा ब. 13. माधुरा ब. 14. स्त्रीप्रत्ययप्रसङ्गः फ. 15. नास्ति ब. 16. अण् नास्ति फ. 17. आतः ग. 18. सम्बध्यते ग. 19. टापोऽपवादः नास्ति फ. 20. तावत् नास्ति क. 21. तु नास्ति फ. 22. कथम् इत्यधिकम् फ. 23. नगरीकारी ब. 24. अञः नास्ति फ.